QZ8RDB

प्रथमः पाठः

# वार्तालापः (खण्ड–अ)

## 1. मित्रस्य परिचयः



सरोवरः – नमो नमः, भवतः किं नाम अस्ति?

विभवः – मम नाम विभवः अस्ति।

सरोवरः – किं भवतः प्रियविषयः?

विभवः – संस्कृतम् इति मम प्रियविषयः।

सरोवरः – भवान् कुत्र गच्छति?

विभवः – अहं जगदलपुरं गच्छामि।

सरोवरः – कथम्?

विभवः – बस्तरस्य सौन्दर्यं द्रष्टुं गच्छामि।

सरोवरः – बस्तरे बहूनि दर्शनीयानि स्थलानि सन्ति। किं दर्शनीयस्थलं द्रष्टुम् इच्छसि?

विभवः – अहं तीरथगढप्रपातं द्रष्टुम् इच्छामि।

## 2. कक्षायां छात्राणां सम्भाषणम्

वशीमः – नदीम! भवतः किं करोति?

नदीमः – अहं संस्कृतं पठामि।

वशीमः – श्वः सायंकाले भवान् कुत्र मिलिष्यति?

नदीमः – श्वः सायंकाले अहं स्वगृहे मिलिष्यामि।

वशीमः – नदीम! भवान् सत्यं वदति किम्?
भवान् जशपुरं गमिष्यति, परश्वः आगमिष्यति।

नदीमः – अहं तु विस्मृतवान्।

नीरजः – किशन ! अद्य मम गृहम् आगच्छतु। सम्यक् पठिष्यावः।

किशनः – भवन्तः मम गृहम् आगच्छन्तु। सर्वे मिलित्वा क्रीडिष्यामः।

## 3. गुरु–शिष्ययोः संवादः



गुरुः – भवतः किं नाम अस्ति?
शिष्य : – महोदय! मम नाम संजीवः अस्ति।
गुरुः – भवान् कुतः आगच्छति?
शिष्यः – अहं रायपुरनगरात् आगच्छामि।
गुरुः – भवतः पितुः किं नाम अस्ति?
शिष्यः – महोदय! मम पितुः नाम महेन्द्रः अस्ति।
गुरुः – त्वं कस्यां कक्षायां पठसि?
शिष्यः – अहं दशम्यां कक्षायां पठामि।

## 4. उद्याने वार्तालापः

रणधीरः – रणवीर! भवान् कुत्र गच्छति?
रणवीरः – अहम् उद्यानं प्रति गच्छामि।
रणधीरः – किमर्थम्?
रणवीरः – भ्रमणार्थम्?
रणधीरः – प्रातःकाले भ्रमणं मह्यम् अपि रोचते।
रणवीरः – तर्हि भवान् चलतु।
रणधीरः – बाढम्! अहमपि चलामि।

## 5. पर्यावरणस्य रक्षणम्



पूजा – भो प्रिये! त्वं किं पश्यसि?
प्रिया – एतान् वृक्षान् पश्यामि।
पूजा – एतान् वृक्षान् के आरोपितवन्तः?
प्रिया – अस्माकं पूर्वजाः आरोपितवन्तः।
पूजा – अस्माकम् अपि कर्त्तव्यं वर्तते,
वयं अपि पादपान् रोपयाम।
प्रिया – त्वं सत्यं कथयसि।
पूजा – किं त्वं फलानि खादितुम् इच्छसि?

प्रिया – आम्।

पूजा – तर्हि त्वम् अपि एकं पादपम् आरोपय।

## 6. क्रीडाविषये सम्भाषणम्

प्रवरः – प्रखर! भवान् कुत्र गच्छति?

प्रखरः – अहम् उद्यानं प्रति गच्छामि।

प्रवरः – किमर्थम्?

प्रखरः – क्रीडनार्थम्।

प्रवरः – प्रातःकाले क्रीडनं मह्यम् अपि रोचते।

प्रखरः – तर्हि भवान् मया सह एव चलतु।

प्रवरः – नहि, अहं स्व पित्रा सह उपवने गच्छामि।

प्रखरः – उचितम्! , श्वः आवां प्रातः क्रीडनाय उद्यानं प्रति गमिष्यावः

## 7. माता–पुत्रयोः सम्भाषणम्

माता – मोहित! किं करोषि त्वम्?

पुत्रः – संस्कृतं पठामि मातः।

माता – त्वया भोजनं कृतं किम्?

पुत्रः – आम्

माता – आपणं गच्छसि किम्?

पुत्रः – मातः शीघ्रं गच्छामि। किम् आनयानि ततः।



## 8. नगर– भ्रमणम्

परागः – भूपेश! त्वं भ्रमणाय कुत्र गमिष्यसि?

भूपेशः – कोरबानगरं प्रति गमिष्यामि।

परागः – कदा गमिष्यसि?

भूपेशः – ग्रीष्मावकाशे अहं गमिष्यामि।

परागः – केन यानेन?

भूपेशः – रेलयानेन।

परागः – कोरबानगरं किमर्थं प्रसिद्धम्?

भूपेशः – अत्र राष्ट्रिय–तापविद्युतकेन्द्रमस्ति। अतएव प्रसिद्धम्।

## 9. वैद्य–रोगी सम्भाषणम्



वैद्यः – भो मुकुल! त्वं कथम् असि?

रोगी – अहं कुशली नास्मि।

वैद्यः – किम् अभवत्?

रोगी – ज्वरेण पीडितोऽस्मि।

वैद्यः – अहं तु त्वां ज्वरौषधिं दास्यामि।

रोगी – धन्यवादः महोदयः।

## 10. संस्कृतव्याकरणविषये वार्तालापः

मणिका – त्वं किं पठसि?

भारती – अहं संस्कृतं पठामि।

मणिका – संस्कृतस्य कः अध्यायः?

भारती – केवलं व्याकरणम् एव।

मणिका – व्याकरणे एव तव रुचिः।

भारती – व्याकरणं तु मह्यम् अतीव रोचते।

मणिका – व्याकरणं तु भाषायाः आधारभूतं भवति।

भारती – त्वं सत्यं कथयसि।

मणिका – अधुना अहं चलितुम् इच्छामि।

भारती – उपविश। पेयं पीत्वा गच्छ।

मणिका – क्षम्यताम् इदानीं गच्छामि।

## शब्दार्थाः

| | | |
|---|---|---|
| भवान | = | आप |
| श्वः | = | आने वाला कल |
| परश्वः | = | आने वाला परसों |
| विस्मृतः | = | भूल गया |
| सम्यक् | = | अच्छी तरह से |
| कुतः | = | कहाँ से? |
| आम् | = | हाँ |
| किमर्थम् | = | किसलिए |
| क्रीडनम् | = | खेलना |
| तर्हि | = | तो |
| भ्रमणार्थम् | = | घूमने के लिए |
| बाढम् | = | अच्छा |
| आरोपितवन्तः (आ+रुह्+णिच्+क्तवतु) | = | रोपण किये |
| रोपयाम (लोट्लकार उत्तमपुरुष बहुवचन) | = | रोपण करें |
| यानेन | = | वाहन से (साधन से) |
| अधुना | = | अभी/अब/इस समय |
| इदानीम् | = | अब, इस समय |

## अभ्यासः

1. संस्कृत भाषया उत्तरत –

(क) विभवः कं प्रपातं द्रष्टुम् इच्छति?

(ख) रणधीराय किं रोचते?

(ग) अस्माकं कर्त्तव्यं किम्?

(घ) कोरबानगरं किमर्थं प्रसिद्धम्?

(ङ.) भारत्यै किम् अतीव रोचते?

2. अधोलिखितानां शब्दानां मूलशब्द–विभक्तिवचन–लिङ्गानि लिखत –

| | शब्दरुपम् | मूलशब्दः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| यथा– | भवतः | भवत् | पुल्लिंगम् | षष्ठी | एकम् |
| 1. | बस्तरे | ———— | ———— | ———— | ———— |
| 2. | कक्षायां | ———— | ———— | ———— | ———— |
| 3. | सर्वे | ———— | ———— | ———— | ———— |
| 4. | कस्यां | ———— | ———— | ———— | ———— |
| 5. | पित्रा | ———— | ———— | ———— | ———— |
| 6. | यानेन | ———— | ———— | ———— | ———— |

3. अधोलिखितानां पदानां धातुलकारपुरुषवचनानि लिखत–

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| यथा– | गच्छति | गम् | लट् | प्रथमः | एकम् |
| 1. | इच्छामि | ———— | ———— | ———— | ———— |
| 2. | मिलिष्यति | ———— | ———— | ———— | ———— |
| 3. | आगच्छतु | ———— | ———— | ———— | ———— |
| 4. | रोचते | ———— | ———— | ———— | ———— |
| 5. | आरोपय | ———— | ———— | ———— | ———— |

4. सुमेलनं कुरुत –

| | | | |
|---|---|---|---|
| 1. | बस्तरे | – | (क) क्रीडिष्यामः |
| 2. | सर्वे मिलित्वा | – | (ख) गच्छसि |
| 3. | त्वं कुत्र | – | (ग) तीरथगढप्रपातम् |
| 4. | ज्वरेण | – | (घ) आरोपितवन्तः |
| 5. | एतान् वृक्षान् | – | (ङ) पीडितोऽस्मि |

5. रिक्तस्थानानि पूरयत –

1. अहं .....................कक्षायां पठामि।
2. क्रीडनं .....................अपि रोचते।
3. त्वम् अपि एकं ..........................आरोपय।
4. अहं तु त्वं ............................दास्यामि।
5. ............................तु भाषायाः आधारः भवति।

6. संस्कृतभाषया अनुवादं कुरुत –

1. आपका नाम क्या है?
2. मैं संस्कृत पढ़ता हूँ।
3. वशीम परसों आयेगा।
4. आप मेरे साथ ही चलिए।
5. बैठो, पेयपदार्थ पीकर जाओ।

7. प्रकृतिप्रत्ययौ पृथक् कुरुत –

यथा – द्रुष्टुम् = दृश् + तुमुन्

1. विस्मृतवान् =
2. मिलित्वा =
3. खादितुम् =
4. कृतम् =
5. पठन् =

8. अधोलिखितेषु वाक्येषु अव्ययपदानि चित्वा लिखत–

1. भवान् कुत्र गच्छति।
2. रामः ह्यः विद्यालयं गतवान्।
3. अद्य मम गृहम् आगच्छतु।
4. राहुलेन सह एव क्रीडतु।
5. यदा श्रेया क्रीडति तदा सीता पठति।

# संस्कृत गीतम् (खण्ड–ब)

## भारतं भारतं भवतु भारतम्

भारतं भारतं। भवतु भारतम्।
शस्त्रधारकं शास्त्रधारकं
शस्त्रशास्त्रधारकं भवतु भारतम्।
भारतम् ............ । 1 ।

कर्मनैष्ठिकं धर्मनैष्ठिकं
कर्मधर्मनैष्ठिकम्।
भारतम्............ । 2 ।

मुक्तिदायकं भक्तिदायकं
मुक्तिभक्तिदायकम्।
भारतम्............ । 3 ।

शान्तिदायकं शक्तिदायकं
शान्तिशक्तिदायकम्।
भारतम्............ । 4 ।

————000————

QZHMEY